# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ८५

तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ ।
यथोक्तमृषिणा पूर्वं तत्र तत्राभ्यगायताम् ॥ १ ॥

तां स शुश्राव काकुत्स्थः पूर्वचर्यां ततस्ततः ।
अपूर्वां पाठ्य जातिं च गेयेन समलङ्कृताम् ॥ २ ॥

प्रमाणैर्बहुभिर्बद्धां तन्त्रीलयसमन्विताम् ।
बालाभ्यां राघवः श्रुत्वा कौतूहलपरोऽभवत् ॥ ३ ॥

अथ कर्मान्तरे राजा समानीय महामुनीन् ।
पार्थिवांश्च नरव्याघ्रः पण्डितान्नैगमांस्तथा ॥ ४ ॥

पौराणिकाञ्शब्दवितो ये च वृद्धा द्विजातयः ।
एतान्सर्वान्समानीय गातारौ समवेशयत् ॥ ५ ॥

हृष्टा ऋषिगणास्तत्र पार्थिवाश्च महौजसः ।
पिबन्त इव चक्षुर्भ्यां राजानं गायकौ च तौ ॥ ६ ॥

परस्परमथोचुस्ते सर्व एव समं ततः ।
उभौ रामस्य सदृशौ बिम्बाद्बिम्बमिवोद्धृतौ ॥ ७ ॥

जटिलौ यदि न स्यातां न वल्कलधरौ यदि ।
विशेषं नाधिगच्छामो गायतो राघवस्य च ॥ ८ ॥

तेषां संवदतामेवं श्रोतॄणां हर्षवर्धनम् ।
गेयं प्रचक्रतुस्तत्र तावुभौ मुनिदारकौ ॥ ९ ॥

ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम् ।
न च तृप्तिं ययुः सर्वे श्रोतारो गेय सम्पदा ॥ १० ॥

प्रवृत्तमादितः पूर्वं सर्गान्नारददर्शनात् ।
ततः प्रभृति सर्गांश्च यावद्विंशत्यगायताम् ॥ ११ ॥

ततोऽपराह्णसमये राघवः समभाषत ।
श्रुत्वा विंशतिसर्गांस्तान्भरतं भ्रातृवत्सलः ॥ १२ ॥

अष्टादश सहस्राणि सुवर्णस्य महात्मनोः ।
ददस्व शीघ्रं काकुत्स्थ बालयोर्मा वृथा श्रमः ॥ १३ ॥

दीयमानं सुवर्णं तन्नागृह्णीतां कुशीलवौ ।
ऊचतुश्च महात्मानौ किमनेनेति विस्मितौ ॥ १४ ॥

वन्येन फलमूलेन निरतु स्वो वनौकसौ ।
सुवर्णेन हिरण्येन किं करिष्यावहे वने ॥ १५ ॥

तथा तयोः प्रब्रुवतोः कौतूहलसमन्विताः ।
श्रोतारश्चैव रामश्च सर्व एव सुविस्मिताः ॥ १६ ॥

तस्य चैवागमं रामः काव्यस्य श्रोतुमुत्सुकः ।
पप्रच्छ तौ महातेजास्तावुभौ मुनिदारकौ ॥ १७ ॥

किम्प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः ।
कर्ता काव्यस्य महतः को वासौ मुनिपुङ्गवः ॥ १८ ॥

पृच्छन्तं राघवं वाक्यमूचतुर्मुनिदारकौ ।
वाल्मीकिर्भगवान्कर्ता सम्प्राप्तो यज्ञसंनिधिम् ।
येनेदं चरितं तुभ्यमशेषं सम्प्रदर्शितम् ॥ १९ ॥

आदिप्रभृति राजेन्द्र पञ्चसर्ग शतानि च ।
प्रतिष्ठा जीवितं यावत्तावद्राजञ्शुभाशुभम् ॥ २० ॥

यदि बुद्धिः कृता राजञ्श्रवणाय महारथ ।
कर्मान्तरे क्षणी हूतस्तच्छृणुष्व सहानुजः ॥ २१ ॥

बाढमित्यब्रवीद्रामस्तौ चानुज्ञाप्य राघवम् ।
प्रहृष्टौ जग्मतुर्वासं यत्रासौ मुनिपुङ्गवः ॥ २२ ॥

रामोऽपि मुनिभिः सार्धं पार्थिवैश्च महात्मभिः ।
श्रुत्वा तद्गीतमाधुर्यं कर्मशालामुपागमत् ॥ २३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com